संस्कृत-वार्ता:

07.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- भारतीय-जनता-पार्टीति दलस्य वरिष्ठनेता एवं प्रधानमन्त्री नरेन्द्रमोदी अद्य अकथयत् यत् इण्डी-इत्याख्यं संयुक्तदलं निकषा स्पष्ट-दृष्टिकोणस्य विश्वसनीयतायाश्च अभावो विद्यते।
- भारतीयतटरक्षकपोतेन आईसीजीएस वीरा इत्यनेन बङ्गालखात्यां आन्ध्रप्रदेशतटस्य समीपे नव मत्स्यजीविनः उद्धारिताः।
- माइक्रोसॉफ्ट संस्थया संचेतिता यत् चीनदेश: कृत्रिमबुद्धिमत्ताया: माध्यमेन भारत-अमरीका-दक्षिणकोरियादेशेषु निर्वाचनप्रक्रियां रोद्धुं सज्जतां करोति।
- भारतर्तु-विज्ञान-विभागेन अद्य महाराष्ट्र- मध्यप्रदेश - छत्तीसगढ - पश्चिमबंगाल - ओडिशा- राज्यानां केषुचित् भागेषु नारङ्गवार्णिकि- संचेतना प्रख्यापिता ।
- आई.पी.एल् इत्यस्यां क्रिकेटमालिकायां मुम्बय्या: वानखेड़े क्रीडांगणे मुम्बई इण्डियन्स-डेल्हीकैपिटल्स-दलयो: प्रतिस्पर्धा सम्प्रति प्रचलति।

<u>बिहार-प्रधानमन्त्री जनसभा</u>

भारतीय-जनता-पार्टीति दलस्य वरिष्ठनेता एवं प्रधानमन्त्री नरेन्द्रमोदी अद्य अकथयत् यत् इण्डी-इत्याख्यं संयुक्तदलं निकषा स्पष्ट-दृष्टिकोणस्य विश्वसनीयतायाश्च अभावों विद्यते। तस्य दलस्य पारस्परिकमतभेद: जनानां सम्मुखे अस्ति। अद्य बिहारराज्ये नवादाया: कुन्तीनगरे एकां नैर्वाचनिक-जनसभां सम्बोधयन् प्रधानमन्त्री उक्तवान् यत् विपक्षि-संयुक्त-दलस्य नेतार: तस्य प्रदत्त-वचनेभ्य: भीता:। असौ निगदितवान् यत् विपक्ष: भ्रष्टाचारसंवर्धनं विकासबाधां च इच्छति। श्रीमोदी अग्रे प्रत्यपादयत् यत् अनेन साम्प्रतं यावत् सर्वाणि वचनानि पूरितानि। श्रीमोदिना आरोपित: यत् कांग्रेसदलं राष्ट्रियजनतादलं अन्यानि विपक्षिदलानि देशविभाजनं इच्छन्ति यतोहि तानि दलानि एवं न वाञ्छन्ति यत् संवैधानिकविधि: सम्पूर्णदेशे क्रियान्विता भवेत्। असौ कांग्रेसदलस्य नैर्वाचनिक-घोषणापत्रं तुष्टिकरणस्य प्रपत्रं उद्घोषितवान्। प्रधानमन्त्री स्वीयवचनानि उररीकृत्य अवदत् यत् विगतेषु दशवर्षेषु सप्तत्यधिकत्रिंशतं अनुच्छेद: ट्रिपलतलाक-सदृशानि कार्याणि तस्य वचनान्तर्गतमेव विराजन्ते। तेनोक्तं राममन्दिरस्य स्वप्ननिर्माण: पञ्चशतवर्षाणाम् अनन्तरमेव सम्पूरित:, कांग्रेसदलेन अस्यापि विरोध: कृत:। नैर्वाचनिकजनसभायाम् एतस्यां बिहारस्य मुख्यमन्त्री नीतिशकुमार: एन्.डी.ए. संयुक्त दलस्य अनेके नेतार: उपस्थिता: आसन्। सप्ताहान्तर्गतं प्रधानमन्त्रिण: बिहारराज्ये इयं द्वितीया नैर्वाचनिक जनसभा वर्तते। इत: प्राक् गतसप्ताहस्य चतुर्थे दिनांके श्रीमोदिना जमुईनिर्वाचनक्षेत्रात् राज्येऽस्मिन् निर्वाचनप्रचाराभियानं

समारब्धम्। अवधेयं वर्तते यत् नवादा-संसदीय-क्षेत्रात् भाजपेतिदलेन विवेकठाकुर: अवतारित:, य: भाजपाया: वरिष्ठनेतु: केन्द्रियमन्त्रिणश्च डॉ.सी.पी.ठाकुरस्य पुत्रो वर्तते। लोकसभा-निर्वाचनस्य प्रथमे चरणे नवदश-अप्रैलमासे भविष्यति। बिहारराज्ये औरंगाबाद-जमुई-जनपदाभ्यां सह नवादासंसदीयक्षेत्रेभ्य: मतदानम् अस्मिन्नेव चरणे भविष्यति।

तटरक्षक-उद्धारः

भारतीयतटरक्षकपोतेन आईसीजीएस वीरा इत्यनेन बङ्गालखात्यां आन्ध्रप्रदेशतटस्य समीपे नव मत्स्यजीविनः उद्धारिताः। एतेषां मत्स्यजीविनां नौका अग्निकाण्डेन समुद्रे मग्नः अभवत्। रक्षामन्त्रालयेन उक्तं यत् घटनायाः स्थितिं ज्ञात्वा आईसीजीएस वीरा कतिपयेषु होरासु एव स्थाने सम्प्राप्य जीवितानां सहयोगं कृतम्। तस्मिन् उक्तं यत्, सर्वेऽपि नव मत्स्यजीविनः आईसीजी-पोते स्थानान्तरिताः यत्र तेभ्यः चिकित्सादलेन प्राथमिकचिकित्सा: प्रदीयते। पश्चात् सर्वान् व्रणितान् मत्स्यजीविनः विशाखापत्तनम-नगरस्य किङ्ग् जार्ज-चिकित्सालये विशिष्टचिकित्सायै स्थानान्तरिताः । आईसीजी-पोतस्य द्रुतप्रतिक्रियया षड्होरानां अल्पकाले एव सम्पूर्णं उद्धारकार्यं सम्पन्नम् । भारतीयतटरक्षकः समुद्रे मत्स्यजीविभ्यः सहयोगं प्रदातुं प्रमुखः विभागेन सममेव समुद्रे अन्वेषण-उद्धार- कार्याणां राष्ट्रियसमन्वयक-संस्थापि अस्ति।

माइक्रोसॉफ्ट

माइक्रोसॉफ्ट संस्थया संचेतिता यत् चीनदेश: कृत्रिमबुद्धिमत्ताया: माध्यमेन भारत-अमरीका-दक्षिणकोरियादेशेषु निर्वाचनप्रक्रियां रोद्धुं सज्जतां करोति। चीनद्वारा ताइवान-देशस्य राष्ट्रपति-निर्वाचनावधौ परिणामान् प्रभावयितुं कृत्रिम-मेधया संचालितस्य परीक्षणस्य अनन्तरं इयं संचेतना आगता। अस्मिन् वर्षे यूरोपीयसंघं अतिरिच्य विश्वस्य न्यूनातिन्यूनं चतुष्षष्टि: देशेषु निर्वाचनं भविष्यमाणमस्ति। एतेषु देशेषु आहत्य विश्वस्य नवचत्वारिंशत्-प्रतिशतं जनसंख्या: निवसन्ति।

भारतर्तु-

भारतर्तु-विज्ञान-विभागेन अद्य महाराष्ट्र- मध्यप्रदेश - छत्तीसगढ - पश्चिमबंगाल - ओडिशा-राज्यानां केषुचित् भागेषु नारङ्गवार्णिकी- संचेतना प्रख्यापिता । एतेषु प्रख्यापित क्षेत्रेषु विद्युद्ध्वनिना सह वृष्टयाः तीव्रवायोश्च अनुमानमपि निगदितम् । तत्रैव देशस्य पूर्वोत्तरीय-क्षेत्रेषु अग्रिमे षड्दिनावधौ पञ्चाशत्- किलोमीटर मितात्मकेन वेगेन वायुः प्रवक्ष्यति । झारखण्ड- पश्चिमबंगाल- ओडिशा - बिहार-राज्येषु श्वः यावत् इयं स्थितिः यथावदेव भविष्यति ।

आन्ध्रप्रदेशे अद्य तमिलनाडु-पुडुचेरी तेलंगाना राज्येषु च श्वः महाराष्ट्र- केरलयोः द्वादशदिनांकं यावत् वृष्टेः तीव्रवायो: च अनुमानं वर्तते । उत्तराखण्डे आगामिनं षड्दिवसं यावत् अल्वृष्टिः हिमपातश्च भविष्यति ।

## निर्वाचनायोग: सुविधा

निर्वाचनायोगेन कथितं यत् अस्य वर्षस्य लोकसभा-निर्वाचनस्य मतदानघोषणाया: विंशतिदिनानां आभ्यन्तरे एव सुविधा-इत्याख्ये अन्तर्जालपटले त्रिसप्तति-सहस्राधिकानि आवेदनानि प्राप्तानि। अस्य पटलस्य माध्यमेन जनप्रदर्शन्या: आयोजनस्य अस्थायि-दल-कार्यालयानाम् उद्घाटनस्य प्रतिगृहं गत्वा प्रचार-प्रसारस्य च अनुमतिं प्राप्तुं शक्यते। निर्वाचनायोगेन कथितं यत् प्राप्तानुरोधेषु षड्शताधिक-चतु:चत्वारिंशत् सहस्रं अधिका: स्वीकृता: जाता:। अवधेयास्पदं वर्तते यत् इदं सुविधापोर्टल-पटलं निर्वाचनप्रबन्धने पारदर्शितां संवर्धयति। एतत् अन्तर्जालपटलं निर्वाचनायोगेन विकसितमस्ति यत् स्वतन्त्र-निष्पक्ष-पारदर्शि-निर्वाचनस्य लोकतान्त्रिक-सिद्धान्तानां अनुरूपं वर्तते। द्विशताधिक-एकादशसहस्रं अनुरोधा: अपि निषेधिता: दशसहस्रं च निरस्तीकृता: शेषावेदनानि प्रक्रियाधीनानि वर्तन्ते। बृहत्तमस्तरे तमिलनाडुराज्यात् त्रयोविंशति-सहस्र अनुरोधा: आगता:। पश्चिम-बंगालत: द्वादशसहस्रं मध्यप्रदेशात् च दशसहस्रं यावत् अनुरोधा: प्राप्ता।

## विश्वस्वास्थ्यदिवसः

वैश्विकस्वास्थ्यजागरूकताया: सम्वर्धनाय अद्य विश्वस्वास्थ्यदिवसः आचर्यते। विश्वस्वास्थ्यसङ्गठनेन (WHO) इत्यनेन अस्मिन् वर्षे 'मम स्वास्थ्यं, मम अधिकारः' इति विषयः उद्घोषितः येन विश्वस्य आर्धाधिकजनसंख्यायाः न्यूनातिन्यूनं चत्वारि दसमलव पञ्च अर्बुद जनानाम् आवश्यकस्वास्थ्यसेवानां गभीराभावं दूरिकर्तुं शक्यते। आकाशवाण्याः सह चर्चायां एम्स् नवदिल्ल्याः प्रोफेसर डॉ. रीमा दादा इत्यनाया प्रोक्तं यत् जीवनशैल्याः प्रमुखपरिवर्तनानि योगादिप्रथानां स्वीकरणेन च सामान्य रोगाणां प्रहारे साहाय्यं कर्तुं शक्यते यानि रोगानि विशेषतः युवानां मध्ये वर्धमानानि सन्ति। विश्वस्वास्थ्यदिवसः प्रथमवारं पञ्चाशदधिक-ऊनविंशति तमे वर्षे विश्वस्वास्थ्यसंघटनेन संस्थायाः स्थापनायाः उपलक्षे स्वास्थ्यमहत्त्वे वैश्विक-ध्यानाक्रष्टुम् च आयोजितः।

## आई.पी.एल. – क्रिकेट

आई.पी.एल् इत्यस्यां क्रिकेटमालिकायां मुम्बय्या: वानखेड़े क्रीडांगणे मुम्बई इण्डियन्सदलस्य प्रतिस्पर्धा डेल्हीकैपिटल्सदलेन सह भविष्यति। डेल्ही कैपिटल्सदलेन पणकं विजित्य कन्दुकक्षेपणं स्वीकृतम्। अत्रान्तरे मुम्बई इण्डियन्स दलेन पञ्चत्रिंशदधिक त्रिशतं धावनांका: विनिर्मिता:। अद्यैव द्वितीया स्पर्धा लखनऊनगरे लखनऊसुपर जायन्ट्स-गुजरात-टाइटेन्सदलयोर्मध्ये सायं सार्धसप्तवादनतो समारप्स्यते।

।। इति वार्ता :।।